# वैकृतिकं रहस्यम्

ऋषिरुवाच ।
त्रिगुणा तामसी देवी सात्त्विकी या त्रिधोदिता ।
सा शर्वा चण्डिका दुर्गा भद्रा भगवतीर्यते ॥ १॥

योगनिद्रा हरेरुक्ता महाकाली तमोगुणा ।
मधुकैटभ नाशार्थं यां तुष्टा वाम्बुजासनः ॥ २॥

दश वक्त्रा दश भुजा दश पादाञ्जन प्रभा ।
विशालया राजमाना त्रिंशल्लोचन मालया ॥ ३॥

स्फुरद्दशन दंष्ट्रा सा भीमरूपापि भूमिप ।
रूप सौभाग्य कान्तीनां सा प्रतिष्ठां महाश्रियः ॥ ४॥

खड्ग बाण गदा शूल चक्र शङ्ख भुशुण्डि भृत् ।
परिघं कार्मुकं शीर्षं निश्च्योत द्रुधिरं दधौ ॥ ५॥

एषा सा वैष्णवी माया महाकाली दुरत्यया ।
आराधिता वशीकुर्यात् पूजाकर्तुश्चराचरम् ॥ ६॥

सर्वदेव शरीरेभ्यो याऽऽविर्भूता ऽमित प्रभा ।
त्रिगुणा सा महालक्ष्मीः साक्षान्महिष मर्दिनी ॥ ७॥

श्वेतानना नील भुजा सुश्वेत स्तन मण्डला ।

रक्तमध्या रक्तपादा नील जङ्घोरु रुन्मदा ॥ ८॥

सुचित्र जघना चित्र-माल्याम्बर विभूषणा ।
चित्रानु लेपना कान्ति रूप सौभाग्य शालिनी ॥ ९॥

अष्टादश भुजा पूज्या सा सहस्र भुजा सती ।
आयुधान्यत्र वक्ष्यन्ते दक्षिणाधः कर क्रमात् ॥ १०॥

अक्षमाला च कमलं बाणोऽसिः कुलिशं गदा ।
चक्रं त्रिशूलं परशुः शङ्खो घण्टा च पाशकः ॥ ११॥

शक्ति र्दण्डश्चर्म चापं पानपात्रं कमण्डलुः ।
अलङ्कृत भुजामेभिर् आयुधैः कमलासनाम् ॥ १२॥

सर्वदेवमयी मीशां महालक्ष्मी मिमां नृप ।
पूजयेत्सर्व लोकानां स देवानां प्रभुर्भवेत् ॥ १३॥

गौरीदेहा त्समुद्भूता या सत्त्वैक गुणाश्रया ।
साक्षात्सरस्वती प्रोक्ता शुम्भासुर निबर्हिणी ॥ १४॥

दधौ चाष्टभुजा बाण मुसले शूल चक्र भृत् ।
शङ्खं घण्टां लाङ्गलं च कार्मुकं वसुधाधिप ॥ १५॥

एषा सम्पूजिता भक्त्या सर्वज्ञत्वं प्रयच्छति ।
निशुम्भ मथिनी देवी शुम्भासुर निबर्हिणी ॥ १६॥

इत्युक्तानि स्वरूपाणि मूर्तीनां तव पार्थिव ।
उपासनं जगन्मातुः पृथगासां निशामय ॥ १७॥

महालक्ष्मी र्यदा पूज्या महाकाली सरस्वती ।
दक्षिणोत्तरयोः पूज्ये पृष्ठतो मिथुन त्रयम् ॥ १८॥

विरञ्चिः स्वरया मध्ये रुद्रो गौर्या च दक्षिणे ।
वामे लक्ष्म्या हृषीकेशः पुरतो देवता त्रयम् ॥ १९॥

अष्टादश भुजा मध्ये वामे चास्या दशानना ।
दक्षिणेऽष्ट भुजा लक्ष्मीर् महतीति समर्चयेत् ॥ २०॥

अष्टादश भुजा चैषा यदा पूज्या नराधिप ।
दशानना चाष्टभुजा दक्षिणोत्तरयो स्तदा ॥ २१॥

कालमृत्यू च सम्पूज्यौ सर्वारिष्ट प्रशान्तये ।
यदा चाष्टभुजा पूज्या शुम्भासुर निबर्हिणी ॥ २२॥

नवास्याः शक्तयः पूज्यास्तदा रुद्र विनायकौ ।
नमो देव्या इति स्तोत्रैर् महालक्ष्मीं समर्चयेत् ॥ २३॥

अवतार त्रयार्चायां स्तोत्र मन्त्रा स्तदाश्रयाः ।
अष्टादश भुजा पूज्या चैषा महिष मर्दिनी ॥ २४॥

महालक्ष्मी र्महाकाली सैव प्रोक्ता सरस्वती ।
ईश्वरी पुण्य पापानां सर्वलोक महेश्वरी ॥ २५॥

महिषान्तकरी येन पूजिता स जगत्प्रभुः ।
पूजयेज्जगतां धात्रीं चण्डिकां भक्त वत्सलाम् ॥ २६॥

अर्घ्यादिभि रलङ्कारैर् गन्ध पुष्पै स्तथाक्षतैः ।
धूपै र्दीपैश्च नैवेद्यैर् नानाभक्ष्य समन्वितैः ॥ २७॥

रुधिराक्तेन बलिना मांसेन सुरया नृप ।
प्रणा माचमनीयेन चन्दनेन सुगन्धिना ॥ २८॥

सकर्पूरैश्च ताम्बूलैर् भक्ति भाव समन्वितैः ।
वामभागेऽग्रतो देव्याश् छिन्नशीर्षं महासुरम् ॥ २९॥

पूजयेन्महिषं येन प्राप्तं सायुज्य मीशया ।
दक्षिणे पुरतः सिंहं समग्रं धर्म मीश्वरम् ॥ ३०॥

वाहनं पूजयेद्देव्या धृतं येन चराचरम् ।
कुर्याच्च स्तवनं धीमांस् तस्या एकाग्र मानसः ॥ ३१॥

ततः कृताञ्जलि र्भूत्वा स्तुवीत चरितैरिमैः ।
एकेन वा मध्यमेन नैकेनेतरयो रिह ॥ ३२॥

चरितार्धं तु न जपेत् जपञ्छिद्र मवाप्नुयात्
प्रदक्षिणा नमस्कारान् कृत्वा मूर्ध्नि कृताञ्जलिः ॥ ३३॥

क्षमापये ज्जगद्धात्रीं मुहु र्मुहुर तद्रितः ।

प्रतिश्लोकं च जुहुयात् पायसं तिलसर्पिषा ॥ ३४॥

जुहुयात्स्तोत्र मन्त्रैर्वा चण्डिकायै शुभं हविः ।
भूयो नामपदै र्देवीं पूजयेत्सु समाहितः ॥ ३५॥

प्रयतः प्राञ्जलिः प्रह्वः प्रणम्यारोप्य चात्मनि ।
सुचिरं भावये दीशां चण्डिकां तन्मयो भवेत् ॥ ३६॥

एवं यः पूजयेद्भक्त्या प्रत्यहं परमेश्वरीम् ।
भुक्त्वा भोगान् यथाकामं देवी सायुज्य माप्नुयात् ॥ ३७॥

यो न पूजयते नित्यं चण्डिकां भक्त वत्सलाम् ।
भस्मी कृत्यास्य पुण्यानि निर्दहे त्परमेश्वरी ॥ ३८॥

तस्मात्पूजय भूपाल सर्वलोक महेश्वरीम् ।
यथोक्तेन विधानेन चण्डिकां सुख माप्स्यसि ॥ ३९॥

इति श्रीवैकृतिकं रहस्यं सम्पूर्णम् ॥